**दिनाङ्क :- 08.10.2026**

**प्रात: - 06:55**

**प्रधानमन्त्री - विकसितभारतसङ्कल्पसभा**

प्रधानमन्त्रिणा नरेन्द्रमोदिना प्रशासनस्य प्रमुखरूपेण निरन्तर-जनसेवां कुर्वता पञ्चविंशतिवर्षाणि पूर्णानि कृतानि। अस्मिन् अवसरे प्रधानमन्त्री नवदिल्ल्यां विकसितभारतसङ्कल्पसभां सम्बोधितवान्। सः उक्तवान् यत् भारतं दूरदर्शिनीतिभिः अथ च कठिनपरिश्रमेण सप्तचत्वारिंशदधिक-द्विसहस्र-तमवर्षपर्यन्तं विकसितराष्ट्रस्य स्वप्नं निश्चितरूपेण साकारयिष्यति। विकसितभारतसङ्कल्पसभां सम्बोधयन् श्रीमोदी उक्तवान् यत् वर्तमानप्रशासनस्य नीतयः सर्वेषां नागरिकानां कृते समाधानोपायानां प्रदाने केन्द्रिताः सन्ति।

**प्रधानमन्त्री - इण्डिया मोबाइल काङ्ग्रेस्**

प्रधानमन्त्री नरेन्द्रमोदी अद्य नवदिल्ल्यां यशोभूमि इत्यत्र इण्डिया मोबाइल काङ्ग्रेस् इत्यस्य दशमसंस्करणस्य उद्घाटनं करिष्यति। ह्यः आरब्धः अयं चतुर्दिवसीयः कार्यक्रमः दूरसञ्चारविभागेन अथ सेल्युलर् ऑपरेटर्स् एसोसिएशन् ऑफ् इण्डिया इत्यनेन च संयुक्तरूपेण आयोज्यते। अस्मिन् कार्यक्रमे दूरसञ्चारस्य, अङ्कीयसम्पर्कस्य तथा प्रौद्योगिकीनवोन्मेषस्य क्षेत्रेषु भारतस्य उल्लेखनीयप्रगतिं प्रदर्शयिष्यते। सहैव वैश्विकस्तरे सहकाराय, निवेशाय तथा ज्ञानविनिमयाय अयं कार्यक्रमः मञ्चं प्रदास्यति। ऐषमः इण्डिया मोबाइल काङ्ग्रेस् इत्यस्य विषयः 'सीमाविहीनविस्तारः' अस्ति, यः अङ्कीयनवोन्मेषे तथा प्रौद्योगिक्याधारितविकासे भारतस्य वर्धमानक्षमतां प्रतिबिम्बयति।

**वस्तुसेवाकरः उपवेशनम्**

वस्तुसेवाकरपरिषदः सप्तपञ्चाशत्तमम् उपवेशनम् अद्य नवदिल्ल्यां 'भारतमण्डपम' इत्यत्र आयोजयिष्यते। वित्तमन्त्रिणः निर्मलासीतारमन् इत्येतस्याः अध्यक्षतायां भविष्यमाणे उपवेशने वस्तुसेवाकरसम्बद्ध-विवादानां समाधानाय तथा क्रयसम्बद्धकर-समायोजनस्य प्रवाहं सुदृढीकर्तुं नीतिसम्बद्ध-परिष्काराणां विषये चर्चा भविष्यति। अस्य उद्देश्यं अनुपालनाय अपेक्षितं समयं व्ययं च न्यूनीकरणम् अस्ति। वित्तमन्त्रालयस्य सूत्रानुसारं प्रशासनं वस्तुसेवाकरव्यवस्थायाम् आगामिपरिष्काराणां कृते पञ्चसूत्रसम्बद्धयोजनायाः प्रस्तावं प्रस्तोष्यति। एतेषां परिष्काराणाम् उद्देश्यं वस्तुसेवाकरव्यवस्थायां वर्तमानाः प्रशासनिकाः बाधाः दूरीकर्तुं, प्रक्रियाः स्वचालिताः सरलीकृताश्च कर्तुं तथा विशेषतः लघुव्यवसायानां कृते अनुपालनभारं न्यूनीकर्तुम् अस्ति।

**ऋतुविभागः**

भारतर्तुविज्ञान-विभागेन अद्य केरल-माहे-तमिलनाडु-पुडुच्चेरी-कराईकल्-उत्तराखण्ड-पश्चिमबङ्गाल-सिक्किम चेत्येतेषां स्थलानां केषुचित् क्षेत्रेषु प्रबलवृष्टेः पूर्वानुमानं कृतम् अस्ति। ऋतुविभागानुसारम् अद्य आन्ध्रप्रदेश-बिहार-जम्मू-कश्मीर-झारखण्डेषु विद्युत्पातेन प्रबलवातैश्च सह गर्जनायुक्तवृष्टेः सम्भावना अस्ति।